# Sankarshana Upanishad

# સઙ્કર્ષણોપનિષત્

## Document Information

Text title : sankarShaNopaniShat

File name : sankarShaNopaniShat.itx

Category : upanishhat, vishhnu, upanishad

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 20, 2020

*sanskritdocuments.org*

# સઙ્કર્ષણોપનિષત્

અથ તદ્વિષ્ણોઃ ઇતિ શાન્તિઃ । અથ સઙ્કર્ષણોપનિષદુચ્યતે । શેષો હ વૈ વાસુદેવાત્સઙ્કર્ષણો નામ જાત આસીત્ । સોઽકામયત પ્રજાઃ સૃજેયેતિ । તતઃ પ્રદ્યુમ્નસંજ્ઞં મન આસીત્ । તસ્માદહઙ્કારનામાઽનિરુદ્ધઃ । તતો હિરણ્યગર્ભોઽજાયત । તસ્માદ્દશ પ્રજાપતયો મરીચ્યાદયઃ સ્થાણુદક્ષકર્દમપ્રિયવ્રતોત્તાનપાદાદયોઽપ્યજાયન્ત । તેભ્યઃ સર્વાણિ ભૂતાનિ ચ । તસ્માચ્છેષાદેવ સર્વાણિ સમુત્પદ્યન્તે । તસ્મિન્નેવ પ્રલીયન્તે । સ એવ બહુધા જાયમાનઃ સર્વાન્ પરિપાતિ । સ એવ કાદ્રવેયો વ્યાકરણજ્યૌતિષાદિશાસ્ત્રાણિ નિર્મિમાણો બહુભિર્મુમુક્ષુભિરુપાસ્યમાનોઽખિલાં ભુવમેકસ્મિન્ શીર્ષ્ણિ સિદ્ધાર્થવદ્ધાર- યમાણસ્સર્વૈર્મુનિભિઃ સંપ્રાર્થ્યમાનઃ સહસ્રશિખરમેરોશ્શિરોભિર્વારયમાણો મહાવાયોરહઙ્કારં નિરાચકાર । સ ભગવાન્ યુગસન્ધિકાલે સ્વેન રૂપેણ યુગે યુગે તેનૈવ જાયમાનઃ સ્વયમેવ સૌમિત્રિરૈક્ષ્વાકે (વંશે જા)યમા(નો) રક્ષાંસિ સર્વાણિ વિનિઘ્નન્ ચાતુર્વર્ણ્યધર્માન્ પ્રવર્ત(યતિ) । સ એવ ભગવાન્ યુગસન્ધિકાલે(શરદભ્રસં)નિકાશો રૌહિણેયો વાસુદેવઃ સર્વાણિ ગ(દા)દ્યાયુધશાસ્ત્રાજન્યમણ્ડલાન્નિરાચિકીર્ષ (તિ । ) ભૂભારમખિલં નિચખાન । સ એવ ભગવાન્ (શેષઃ) યુગે તુરીયેઽપિ બ્રાહ્મણ્યાં જાયમા(નો) રામાનુજો ભૂત્વા સર્વા ઉપનિષદ ઉદ્દિધીર્ષ(તિ । ) સર્વાણિ ધર્મશાસ્ત્રાણિ વિસ્તારયિષ્ણુઃ સર્વાનપિ વૈષ્ણવાન્ ધર્માન્ વિજૃમ્ભયન્ સર્વાનપિ પાષણ્ડાન્નિચખાન । સ એષ જગ(દાવિર્ભાવતિરોભાવહેતુઃ । ) સ એષ સર્વાત્મકઃ । સ એષ મુમુક્ષુભિર્ધ્યેયઃ । સ એષ મોક્ષપ્રદઃ એતત્સ્મૃ(ત્વા) સર્વેભ્યઃ પાપ્મે(પ્મ)ભ્યો મુચ્યતે । તન્નામ સઙ્કીર્તયન્ વિષ્ણુસાયુજ્યં ગચ્છતિ । તદેતદ્દિવાઽધીયાનો રાત્રિકૃતં પાપં નાશયતિ । નક્તમધીયાનો દિવસકૃતં પાપં નાશયતિ । તદેતદ્વેદાનાં રહસ્યમ્ । તદેતદુપનિષદાં રહસ્યમ્ । એતદધીયાનઃ સર્વક્રતુફલં

લભતે । શાન્તિમેતિ । મનશ્શુદ્ધિમેતિ । સર્વતીર્થફલં લભતે ।
ય એવં વેદ । દેહબન્ધાદ્વિમુચ્યતે । દેહબન્ધાદ્વિમુચ્યતે ।
ઇત્યેવોપનિષત્ ॥

(વૈષ્ણવ-ઉપનિષદઃ)

ઇતિ સઙ્કર્ષણોપનિષત્ સમાપ્તા ।

Proofread by Kasturi navya sahiti

---

*Sankarshana Upanishad*

pdf was typeset on March 20, 2020

Please send corrections to *sanskrit@cheerful.com*